प्रवेश सं० १६०२३ विषय: धर्मशास्त्रम् क्रम सं०

नाम त्रावणद्वादशी विष्णुपूजकथा निर्णय: (अप्रमाण:) ग्रन्थकार

पत्र सं० १-१२

श्लोक सं०

अक्षर सं० (पंक्तौ) २३ पंक्ति सं० (पृष्ठे) ९

आकार: ८.२ X ४.७ लिपि: दे.ना. आधार: काग.

वि० विवरणम् पू.

पी० एस० यू० पा०--७७ एस० सी० ई०--१६५१--५० ००० 13923 न. १६२७

Indira Gandhi National Centre for the Arts

॥अथश्रवणद्वादशीविष्णुपंचक॥
॥योर्निर्णयः॥शुभंभवतु॥छ॥

Indira Gandhi National
Centre for the Arts

श्र०
१

श्रीरामायनमः॥अथश्रवणद्वादशीनिर्णयः॥श्रवणयोगेद्वा नि०
दश्युपवासोनारदीयेदर्शितः॥शुक्लावायदिवाकृष्णाद्वादशी
श्रवणान्विता॥तयोरेवोपवासस्यत्रयोदश्यांतुपारणं॥एका
दश्यांतुविद्धायांसंप्राप्तेश्रवणेनदा॥उपोष्याद्वादशीपुंण्या
सर्वपापक्षयावहा॥धर्मसंहितायामपि॥यदातुशुक्लद्वादश्यां
नक्षत्रंश्रवणंभवेत्॥तन्नक्षत्रेचोपवासएकादश्ययुतंफलं॥
शुक्रवारादियोगेप्राशस्त्यमुक्तंतत्रैव॥श्रवणद्वादशींपुण्या १
पुण्याभागीरथीसरित्॥अग्वंगारकसंयुक्ताश्रवणद्वादशी
सिता॥षष्ठीवर्षैर्भवेद्वापिनभवेदितिमेमतिः॥मासोपवा

सादधिकंश्रवणद्वादशीव्रतं॥श्रवणद्वादशीसमंनभूतंन
भविष्यति॥श्रवणद्वादशीमुत्क्वानास्तिश्रेष्ठतरातिथिः॥
श्रवणद्वादशीविष्णोर्वासिरंप्रीतिदंनृणां॥सालग्रामोह
रेरूपंतुलसीहरिनेत्रजा॥एकादशीहरिदिनंनक्षत्रंश्रव
णंहरेरिति॥श्रोणाद्वादशीचमध्यान्हव्यापिन्योग्राह्यो
तदाहयुधिष्ठिरंप्रतिश्रीकृष्णः॥भविष्योत्तरपुराणे॥म
ध्यान्हव्यापिनीश्रोणाद्वादशीचतथैवतु॥बहुशास्त्राग
मादेशोमध्यान्हादूर्ध्वमप्यणु॥विष्णुधर्मोत्तरेपि॥द्वाद
श्याश्रवणस्यापिमध्यान्होपरिसंगमः॥दैतेवापोषणंका

Indira Gandhi National
Centre for the Arts

श्र० यंन्यूनंचेन्नैवकारयेतद्गति॥नभस्यशुक्लायाःमाघफाल्गुनयोःकृ नि०
२ ष्णायाद्वादश्याःश्रवणस्यचमध्यंदिनव्यापित्वंतत्रैवोक्तं॥नभस्यद्वा
दशीशुक्लाकृष्णामाघेथफाल्गुने॥श्रोणाचद्वादशीचैकउभेमध्यंदि
नेरवौ॥उपोष्यात्तुप्रयत्नेनविष्णुभक्तैर्विशेषतः॥तत्रैवान्यदपि॥वि
ष्णुर्क्षंतुयदापूर्णंद्वादशीविषमाभवेत्॥उपवासोनकर्तव्योगार्ग्य
स्यवचनंयथेति॥श्रवणयोगेकृष्णद्वादश्याःपुण्यत्वमभिहितंमा
त्स्यपुराणे॥द्वादशीश्रवणोपेताकृष्णापुण्यतमातिथिः॥ननुसाते
नसंयुक्तातावत्येवप्रशस्यते॥षष्ठीघटिकाश्रोणासंयुक्ताद्वादश्यु २
पोष्या॥तदपिभविष्ये॥संपूर्णषष्ठिघटिकाव्याप्याहोरात्रसंयुता॥
द्वादशीश्रोणयुक्ताचह्युपोष्याविष्णुतत्परैरिति॥नचेकोनषष्ठिघ

टिकात्रयस्त्रिंशत्पलाधिका॥श्रोणाचपौर्णमासीचनोपोष्याद्वि
ष्णुतत्परैः॥उत्तराषाढमिश्रंयत्श्रवणंतत्परित्यजेत्॥पूर्वत्रयदि
संपूर्णपरत्रश्रवणंपुनः॥तदानोपोषणंकार्यद्वादश्यांविष्णुतत्परैः॥
संपूर्णषष्ठिघटिकानोपोष्यात्सर्वथातथेति॥भविष्योत्तरपुराणे
षण्णवत्यध्यायेनिषेधवचनानांसत्वात्।संपूर्णषष्ठिघटिकाइत्या
दिविधायकानांसत्वादेवंविरोधेसतिकथंनिर्णयइतिवाच्यं।तेषां
विरोधउदितेत्यादिवत्व्यवस्थितविकल्पः॥सचेत्थं॥निषेधकव
चनानांविष्णुपंचकपरत्वाद्विधायकवचनानांकेवलश्रवणद्वाद
शीपरत्वात्।पुराणांतरेचविधितेसमाख्यावचनं॥द्वादशीश्रव
णोपेतामध्याह्नेदृश्यतेयदि॥सोपोष्यात्सर्वयत्नेननोपोष्यात्वन्य
थातदेति॥उभेमध्यंदिनेत्वासेनोपोष्याद्विष्णुतत्परैः॥संपूर्णाष

Indira Gandhi National
Centre for the Arts

श्र० ष्ठिनाऽप्यस्तुनिःसंदेहमुपोषणमिति॥विपक्षेबाधकमुक्तंभविष्ये। नि०
२ द्वादश्यांश्रोणयुक्तायांयोनकुर्यादुपोषणं॥पुण्यं[illegible]रितंतेनत
थासौनरकंव्रजेदिति॥मत्स्यपुराणे॥द्वादश्यांभाद्रशुक्लायांनक्ष
त्रंश्रवणंयदि॥उपोष्याद्वादशीतत्रहरिमभ्यर्चयेन्नरः॥नारदीये॥
उत्तराषाढावेधरहितःश्रवणंयुक्तः॥भाद्रेतुशुक्लद्वादश्यांनक्षत्रं
श्रवणंयदि॥श्रवणद्वादशीनामसाप्रोक्तामुनिपुंगवैः॥उत्तरा
वेधरहितःश्रवणोद्वादशीयुतः॥यदिप्राप्नोतिमध्याह्नंकुर्यात्त
स्यामुपोषणमिति॥पुराणांतरेतु॥उत्तराषाढसंमिश्रांश्रवण
द्वादशीयदि॥सुरयाबिंदुनास्पृष्टंगंगाभद्रवसंत्यजेदिति॥य २
दापूर्वतिथौएकादशीश्रवणद्वादश्युपवासोनैरंतर्येणप्राप्नु
यात्॥तदापारणंविनापूर्वोपवासस्यासमाप्तत्वात्॥द्वितीयो

पवासक्रमोनसंभवति॥असमाप्तव्रतेपूर्वेनैवकुर्याद्व्रतांतरमि
ति॥व्रतमध्येव्रतांतरोपक्रमनिषेधात्॥पारणांतंव्रतंज्ञेयमिति
पारणेनैवव्रतसमाप्तिश्रवणाच्चेतिचेदुत्तरसर्वतिथीषुनैरंत
र्येणोपवासाशक्तौउदकपारणंकृत्वाद्वितीयोपवासक्रमःका
र्यः।तस्याशिताशितरूपत्वेनोभयनिर्वाहकत्वात्।असितान
सितरूपत्वंचतस्ययजुर्वेदब्राह्मणेश्रूयते।यदानुपवसेत्क्षोधु
कःस्याद्यदश्नीयात्रुद्रोस्यपशूनमन्येनापोश्नातितन्नेवाशि
तंनेवानशितंनक्षोधुकोभवतिनास्यरुद्रःपशूनभिमन्यत
इति।प्रकृतेतुएकादशीद्वादश्योर्दैवतंकथा।दुद[illegible]पारणमंतरे
णापिनक्लि[illegible]षः॥तथाचस्मरंति॥एकादश्[illegible]ष्यैवद्वा
दशीसमुपोषयेत्॥नतत्रविधिलोपस्यादुभयोर्दैवतंहरिरि

Indira Gandhi National
Centre for the Arts

तिस्कांदे॥ननुउपोष्यद्वादशीशुद्धांविष्णुर्क्षेणसमन्वितां॥ए 
कादश्युद्भवंपुण्यंनरःप्राप्नोत्यसंशयं॥एवमेकादशीत्यक्त्वाद्वा
दशींसमुपोषयेत्॥पूर्ववासरजंपुण्यंनरःप्राप्नोत्यसंशयं॥द्वा
दशीश्रवणोपेतात्याज्याह्येकादशीतिथिः॥श्रवणद्वादशीश्रे
ष्ठानृणांसंसारमोचनी॥द्वादशीश्रवणोपेताविष्णुप्रीतिक
राशुभा॥वैष्णवद्वयसंयोगःसैवोपोष्यामहातिथिरिति॥
नारदीयस्मृत्यंतरधर्मसंहितावचनैःएकादश्यामुपवासत्या
गेनद्वादशीदिनोपवासविधानादुभयोपवासोनुपपन्नइति
चेत्न।नह्युक्तवचनानामेकादश्युपवासनिषेधेतात्पर्यंकिं 
तुश्रवणद्वादश्युपवासस्यावश्यकतायांअन्यथैकादशीभो
जनप्रसक्तौअपत्यविनाशायुःक्षयकरनरकपातसुकृतहा

निरित्यादिकमापद्येत॥एवंचदिनद्वयेप्युपवासःसर्वथाकार्यः।
यदातुश्रवणएकादशींद्वादशींचस्पृशतिसाविष्णुशृंखला॥त
दुक्तंपद्मपुराणे॥द्वादश्येकादशींस्पृष्ट्वानक्षत्रंश्रवणंयदि॥सा
विष्णुशृंखलानामसायुज्यफलदामता॥विष्णुधर्मेपि॥ए
कादशींद्वादशींचनक्षत्रंश्रवणंयदि॥साविष्णुशृंखलानाम
सर्वपापप्रणाशिनी॥द्वादशीश्रवणर्क्षंचस्पृशेदेकादशीय
दि॥एवंचवैष्णवोयोगोविष्णुशृंखलसंज्ञकः॥तस्मिन्नुपो
ष्यविधिवन्नरःप्रक्षीणकल्मषः॥प्राप्नोत्यनुत्तमांसिद्धिंपुन
रावृत्तिवर्जितामिति॥इतिकेवलश्रवणद्वादशीनिर्णयः॥
अथविष्णुपंचकनिर्णयः॥तथाचभविष्योत्तरेधर्मप्रतिरू

Indira Gandhi National
Centre for the Arts

 ष्णः॥सूतः॥पृथासुतोद्वापरांतेभ्रातृभिःसहितोनयो॥द्वारा 
 वतींधर्मराजस्तप्यमानोदिवानिशं॥तत्रस्थितंजगन्नाथंप्र
णम्यचचतुर्भुजं॥पप्रच्छकृष्णंदेवेशंविष्णुपंचकनिर्णयं॥न
मःसर्वभवायाथब्रह्मणेनंतशक्तये॥कृष्णायवासुदेवायगो
पीनांपतयेनमः॥यदित्वहमनुग्राह्योभ्रातृभिःसहितोनघ॥
संदेहंमेयदुश्रेष्ठतंत्वंछेत्तुमिहार्हसि॥विष्णुव्रतंसमाख्यातं
महापातकनाशनं॥उद्यापनंतद्विधानंतत्फलंतुमयाश्रुतं॥
इदानींश्रोतुमिच्छामिश्रोणायानिर्णयंहरे॥कियद्घटिपरि
मिताश्रोणोपोष्याव्रतेनरैः॥कासुतिथिषुसंयुक्तानग्राह्या 
तद्वदस्वमे।अमायानिर्णयंब्रूहीविस्तरेणमहामते॥एवंपृष्टो

धर्मराज्ञाभगवान्देवकीसुतः॥उवाचपरयाप्रीत्यालोकानांहितका
म्यया॥प्रोष्ठपद्याःसितपक्षेद्वादश्यांश्रवणोयदि॥विष्णुपंचक
माद्याद्व्रतंमत्प्रीतयेनरः॥तत्रैव॥विष्णुपंचकसंज्ञंचमहापातक
नाशनं॥तस्मात्सर्वप्रयत्नेनविष्णुपंचव्रतंचरेत्॥तदनुष्ठानेन
पंचपातकनिवृत्तिर्भवति॥तत्रपंचपातकानि॥ब्रह्महत्यासुरापा
नंस्वर्णस्तेयंतृतीयकं॥गुरुस्त्रीगमनंचैवतत्संसर्गंचपंचममि
ति॥तदारंभःस्कांदे॥मासिभाद्रपदेशुक्लेद्वादश्यांश्रवणोयदि॥
तदारभ्यव्रतंकार्यंमार्गशीर्षंथवान्त्यपेति॥ननुमार्गशीर्षंथ
वान्त्यपेतिसामान्यग्रहणात्मार्गशीर्षद्वादशीपंचमिइतिवा॥
नाद्यः॥विशेषप्रमाणाभावात्लोकाप्रसिद्धत्वात्तस्यामपिश्रव
णाभावाच्चतस्मात्द्वितीयएवावाशिष्यते।नात्रप्रमाणाभावः॥

Indira Gandhi National
Centre for the Arts

शीर्षे

वि॰ मार्गशीर्षसितेपक्षेपंचम्यांश्रवणोयदि॥मध्यान्हव्यापिनौतौहितदारभ्य नि॰
६ व्रतंचरेत्॥इतिस्कांदे॥उपवासपंचकंकार्यं।तत्रकानिदिनानितान्या
हभविष्योत्तरेयुधिष्ठिरंप्रतिकृष्णः॥एकादशीद्वयेचैवश्रवणेपूर्ण
मासके॥दर्शेचकारयेद्भक्त्यावर्षमेकंकुरुद्वहेति॥वाराहेपौर्णिमा
निर्णयः।दिनमानचतुर्थांशोयामइत्युच्यतेबुधैः॥याममात्रंभवे
द्यत्रपौर्णमावैष्णवोनरः॥उपवासस्ततोन्यूनाघटिकैकाथवाभवे
त्॥व्रतीविद्धांनोपवसेत्पौर्णमासींममप्रियः॥तत्रापिस्थलांतरे॥
उदयस्पर्शिदर्शोवैपौर्णमासीचयामिका॥मध्यान्हव्यापिनीश्रो
णाह्युपोष्याद्विसुतत्परैः॥भूतविद्धंपूर्वद्वयंनकार्यं।तदपिवाराहे॥
भूतविद्धांनोपवसेत्पौर्णमासीमिमामपि॥तत्रयदिभूतवेधर ६
हितापूर्वदिनेशुद्धाअमापरदिनेचस्यात्तदातत्रैवोपवासः॥

नात्रप्रमाणाभावः॥यदिशुद्धापूर्वदिनेचतुर्दश्यांनविद्यते॥सू
र्योदयेतदाकुर्यादुपवासंव्रतीनरः।इतिवाराहे॥वृद्धेरभावेभूत
विद्धाभावेचतदापूर्वेद्युरेवदर्शेलंघनंतदपितत्रैव।पूर्वेद्युर्यदिवि
ननु द्धास्यात्तदातत्रैवलंघनमिति।भूतविद्धांनोपवसेदित्यनेनवा
क्येनपूर्वद्वयस्यप्रक्रांतत्वात्सूर्योदयस्पर्शिनीअमैवेतिकथ
मितिचेत्सत्यं।उभयोःप्रक्रांतत्वेपिउपवासस्ततोन्यूनेतिपू
र्णमासीतुयामिकेत्यादिनापौर्णिमायामिकाग्राह्येत्यादि
विधिवत्पौर्णमाउभयस्पर्शिनीग्राह्येति।नचतत्रैवपौर्ण
मासीअमावास्यापरस्मिन्दिवसेपुनः॥यदाभवेत्तदातांतु
समतीत्यैवपारणं॥इत्यनेनपरस्मिन्दिनेउभयपर्वातिक्रमे
णपारणाविहितत्वादेवंसत्फदयस्पर्शदर्शकिथंलंघनमिति

Indira Gandhi National
Centre for the Arts

वि० वाच्यं॥स्मृतिकौस्तुभेप्येवं विष्णुपंचकव्रतेउदयव्यापिन्यमावा नि०
७ स्या॥या।मिकालुषे।र्णिमा।मध्यान्हव्यापिनीश्रोणाचग्राह्या॥
तच्चभविष्यत्पुराणे॥उदयव्यापकोदर्शःपौर्णमासीतुयामि
का॥मध्यान्हव्यापिनीश्रोणाउपोष्या।द्विष्णुतत्परैः॥अन्यत्रा
पि॥अमावास्यांकलामात्रामवशिष्टामुपोषयेदितिउत्तरवा
क्यविरोधादुदयस्पर्शनीआमाग्राह्येतिउदयस्पर्शिदर्शश्वे
तिपूर्ववाक्यविरोधाच्च॥उत्तराषाढमिश्रिताश्रोणानैवोपो
ष्यामध्यान्हतोन्यूनाचनग्राह्यातद्व्यापिनीग्राह्या॥तदपि
वाराहे॥उत्तरामिश्रिताश्रोणानैवोपोष्याव्रतीभवेत्॥ना ७
पिमध्यान्हतोन्यूनालंघनाचभवेद्व्रते॥अतोमध्यान्हगा
ग्राह्याविष्णुव्रतचिकीर्षुभिः॥उत्तरावेधरहितःश्रवणोद्वाद

शीयुतः॥व्याप्नोतियदिमध्यान्हं कुर्यात्तस्यामुपोषणमिति॥स्कां
देपि॥श्रवणेवैश्वभयुक्तेपक्षांतेभूतसं[redacted]युते॥पूर्वविद्धानक
र्तव्यायथासंख्यंपरेहनि॥अनेनविधिनाकुर्यादन्यथानरकंव्रजे
त्॥एकोनषष्ठिघटिकातथापूर्णषष्ठिघटिकाश्रोणापौर्णमासी
चनोपोष्यातदपिस्कांदेचोक्तं॥एकोनषष्ठिघटिकात्रयस्त्रिंशत्स
लाधिका॥श्रोणाचपौर्णमासीचनोपोष्याद्विष्णुतत्परैः॥संपूर्ण
षष्ठिघटिकानोपोष्यासर्वथातिथिरिति॥यदामध्यान्हात्पूर्वं
श्रवणोद्वादशीस्यात्तदानैवोपोष्या॥एतदपिभविष्योत्तरे॥श्रव
णोद्वादशीचापिमध्यान्हात्पूर्वमेवचेत्॥स्वंउतस्यात्तदानैवद्वा
दश्यांसमुपोषयेत्॥विपक्षेबाधकंतत्रैव॥यःकरोत्यभिमाने
नसयातिनरकंध्रुवमिति॥घटिकावृधिस्तुस्कांदे॥त्रयोदशाधि
कानाड्यःसामध्यान्हायदाभवेत्॥श्रोणायामपिकर्तव्यंविष्णु

Indira Gandhi National Centre for the Arts

वि॰ भक्तैरुपोषणं॥ननुयदिदशमीदिनेश्रवणपातस्तदातत्रोपवासः नि॰
८ कर्तव्योनवा॥नाद्यःप्रमाणाभावात्॥नचव्रतविशेषाद्दैवतैक्यासं
चत्वसंख्याविरोधाद्यतत्रोपवासःकर्तव्यएवेतिवाच्यं॥नहियुक्ति
मात्रेणार्थसिद्धिःयुक्तिश्चेत्सर्वापेक्षयाउत्तमाचेत्तर्हिगुरोःउत्त
मत्वात्तन्मलेनैवसंमार्जनादिकर्तव्यंस्यात्॥तस्माद्युक्तिर्नयुक्ता॥
वचनात्प्रवृत्तिरितिन्यायेनवचनस्यावश्यकत्वात्प्रमाणाभावादा
द्यःपक्षउपेक्षणीयः॥तस्मात्द्वितीयःपक्षएवाऽवशिष्यते॥ना
त्रप्रमाणाभावः॥दशम्यांश्रवणेप्राप्तेनैवोपोषेद्व्रतीनरःइतिभवि
ष्योत्तरे॥तत्रैवानर्थफलमुक्तं॥दशम्यांश्रवणेप्राप्तेव्रतभीत्यायु
धिष्ठिर॥उपोषणंयःकुरुतेव्रतच्युतिमवाप्नुयात्॥मृतोनरक ८
माप्नोतियुगानांपंचविंशतिः॥यदामाघकृष्णचतुर्दश्यांश्रोणानो
पोष्या॥तदुक्तंभविष्यषण्णवत्यध्याये॥माघमासस्यकृष्णायां

वि + विष्णुपुराणे॥शिवरात्रिदिनेप्राप्तेविष्णुभक्तस्तुयोभवेत्॥उपवासंनकुर्वीतकृते नरकमा
प्नुयात्॥रुद्राक्षाणांतुमालांयःकंठेधृत्वाकरेथवा॥जप्त्वायदिसमूढात्माव्रथात्नारकीभ
वेत्॥वैखानससंहितायां॥शंखचक्रधरोयस्तुव्रतंकुर्याच्चशांकरं॥ससर्वपितृभिःसार्धंतन्नो गच्छसंशयं॥+१०
चतुर्दश्यांपृथासुत॥युक्तश्चेच्छ्रवणोराजन्नकुर्यात्समुपोषणं॥मा
घेमास्यसितेपक्षेचतुर्दश्यांशिवव्रतं॥यद्यपिश्रवणोपेतानोपो
ष्याद्विष्णुतत्परैरिति॥शिवव्रतंशिवभक्तानांकर्तव्यंतदननुष्ठा
नेऽनर्थफलत्वंचभविष्योत्तरेषण्णवत्यध्यायेश्रूयते॥शिवभक्तै
श्चतुर्दश्यांकर्तव्यंसमुपोषणं॥कुर्याद्वैविष्णुभक्तस्तुविष्णुद्रोही
भवेद्विसः॥विष्णुव्रताभिधानाद्वाश्रवणस्याभिमानतः॥उदा
सीनेनवाराजन्संगदोषेणवापुनः॥द्रव्यलोभाद्भयाद्वापियदिकु
र्यादुपोषणं॥सतत्फलंयातिघोरंरौरवंचमहास्वनं॥कुंभीपाके
ततोराजन्मूढोभवतिभूतले॥जन्मजन्मांतरेराजन्विष्णुद्रोही
भवेद्विसइतिशिवव्रतपराणांअनर्थफलंचोक्तंगरुडपुराणे
इंद्रद्युम्नसंवादेसप्तदशाध्याये॥प्रमादाच्छिवरात्रिंतुयकुर्वति

शि० नराधमाः॥नरकेपच्यमानास्तेयावच्चंद्रदिवाकरा वि तितत्रैव॥अन्य नि०
१ त्र॥शिवरात्रिंपरित्यज्य विद्वामेकादशींतथा॥शैवभावस्वरूपंचसो
हमेवंविसर्जयेदित्यानंदकमले॥माघमासेसितेपक्षेचतुर्दश्यांशि
वव्रतं॥यद्यपिश्रवणोपेतानोपोष्या हि विष्णुतत्परैः॥यस्मिन्दिनेय
दाचैवशैवंकर्मसमाप्यते॥तदानीं विष्णुकर्मापित्याज्यंचफलकां
क्षिभिः॥यथागंगोदकंत्यक्त्वाकूपसंसेवनंतथा॥तथैवशैवसंयु
क्तंनरैःकर्मचदूषितं॥स्कांदेपि॥शैवव्रतादिकंकिंचित्पुराणेषु
स्मृतिष्वपि॥तद्देत्रायुक्तविषयंराक्षसानां विधीयते॥ब्रह्मांडे
पि॥माघमासस्यसितेपक्षेचतुर्दश्यां द्विजोत्तम॥शिवरात्रिव्रतं १
नैवकुर्याद्विष्णुव्रतीनरः॥यद्यपिश्रवणोपेतामाघकृष्णचतुर्द
शी॥तथापिनैवसोपोष्या विष्णुभक्तैः कदाचन॥शिवरात्रिव्रतं

येस्तुक्रीयतेज्ञानमोहितैः॥ज्ञेयाः पाखंडिनस्तेतु सर्वधर्मबहिष्कृताः॥
शिवरात्रिव्रतंकुर्यादितियद्वचनंमुने॥तन्मोहायेतिविज्ञेयंनतुतत्पर
ताभवेदिति॥भागवतेच॥भवव्रतधरायेचयेचतान्समनुव्रताः॥
पाखंडिनस्तेभवंतुसच्छास्त्रपरिपंथिनः॥इति॥यदाहेलादिनाशि
वव्रतेश्रवणोपासनंकुर्वतामनर्थफलवत्वंचोक्तं॥भविष्योत्तरेषण्ण
वत्यध्याये॥हेतुवादेनवाराजन्भक्त्यावाथनराधमः॥माघेकृष्णच
तुर्दश्यांउपवासंकरोतियः॥सयातिनरकंघोरंपितृकोटिकुलान्वि
तः॥राजन्नितियुधिष्ठिरंप्रतिकृष्णोक्तिः॥माघेकृष्णचतुर्दश्यांश्र
वणसंगतेयदि॥तस्मिन्दिनेनकर्तव्यउपवासोह्यसंशयः॥अत्रै
वोदाहरंतीममितिहासंपुरातनं॥पुराकृतयुगस्यांतेहिरण्यक
शिपुःप्रभुः॥आसीद्दुरात्मादुःपापी शिवभक्तः शि॰ प्रियः॥तस्य

Indira Gandhi National Centre for the Arts

वि० शालोमहानासीत्स धर्माख्यायुधिष्ठिर॥विष्णुभक्तिःसतांभक्तःस्नान नि०
१० दानपरायणः॥जपेव्रतेतिनियमेदक्षोभूत्स महायशाः॥कदाचिद्दै
वयोगेनब्रह्महत्याकृतानृप॥सुधर्मणोगृहेकश्चिद्द्विजोभोजनं
कुर्न्नृप॥तदानींदैवयोगेनपाषाणोत्वपतद्धृदि॥सब्राह्मणोमृतस्ते
नपाषाणेनदृढेनच॥प्राप्तातेनसुधर्मेणब्रह्महत्यासुदुष्करा॥
चिंतयामासभूपालःकथंमेनिष्कृतिर्भवेत्॥एवंचिंतयतोराजन्
स्वागतोनारदोमुनिः॥तदासंपूजयामासपप्रछमुनिमादरात्॥
मयाकृताब्रह्महत्याकेनास्यानिष्कृतिर्भवेत्॥इतितेनतुसंपृष्टो
नारदोप्याहतंमुनिः॥शृणुराजन्सुधर्माख्यव्रतंपापप्रणाशनं॥
चतुर्वेदेपुराणेचस्मृतिभिश्चैवनिश्चितं॥ब्रह्महत्यादिपापानांप्रा १०
यश्चित्तंयदिछसि॥तथात्वंकुरुराजेंद्रविष्णुपंचकमुत्तमं॥प्रोष्ठपद्यां

सितेपक्षेद्वादश्यांश्रवणोयदि॥तदारभ्यव्रतंकार्यंभवातेपूरणंभ
वेत्॥एवमुक्त्वानारदोपिजगामत्रिदिवंप्रति॥तदानीकृतवान्रा
जन्विष्णुपंचकमुत्तमं॥तन्मध्येमाघमासेतुहिरण्यकशिपोःपु
रं॥जगामतत्रकृतवान्वासंधर्मार्थकोविदः॥माघकृष्णेचतुर्दश्यां
श्रवणेसंगतेसति॥हिरण्यकशिपुःश्रीमाञ्छिवरात्रिव्रतंनृप॥कृत्वा
स्वयंमहाभागःपुत्रपौत्रादिभिर्युतः॥तस्मिन्दिनेशिवव्रतंशिवप्रीति
विवर्धनं॥विष्णुद्वेषकरंयत्प्रकारयामासदुर्जनैः॥सुधर्माख्योपित
त्संगात्विष्णुव्रतपरायणः॥उपोषणंचकृतवान्श्रवणेसंगदोष
तः॥अज्ञानादपिराजेंद्रभयाद्वापिविलोभतः॥तेनदोषेणमहताव्र
ताद्भ्रष्टोबभूवसः॥तेनैवदोषेणभवेद्दरिद्रीपापाच्चतस्मान्नरकेचिरंव
सन्॥सतत्रस्थित्वायुगपंचसंख्यान्भूमौभवत्कामवशात्सराक्ष

Indira Gandhi National
Centre for the Arts

वि० सः॥ब्रह्मराक्षयोनौतुस्थित्वायुगशतंद्विज॥तदानींदैवयोगेनगालवो नि०
११ भगवान्मुनिः॥तीर्थयात्राप्रसंगेनतंदृष्ट्वाब्रह्मराक्षसं॥रुदंतंप्रव
दंतंतंदृष्ट्वादिव्येनचक्षुषा॥उवाचगालवमुनिर्हितायब्रह्मराक्षसं॥
त्वयाकृतंशिवप्रीत्यैदिनेसम्यगुपोषणं॥तच्छ्रेयोर्थइदानींतुमया
साकंव्रजस्वच॥वर्षमेकंमयासाकंस्नानंकृत्वाविधानतः॥मयो
क्तांहरिवार्तांचश्रुत्वामोक्षमवाप्स्यसि॥इत्युक्तंब्रह्मरक्षोवैतेनसा
कंनदींययौ॥तत्रस्नात्वावर्षमेकंश्रुत्वाहरिकथांशुभां॥ब्रह्मरा
क्षसदेहात्तुमुक्तोमोक्षमवाप्नुवान्॥तस्मात्सर्वप्रयत्नेनशिवरा
त्र्यामुपोषणं॥नैवकुर्यात्ततोराजन्राक्षसत्वंगतोयतः॥तत्रापि ११
मुक्तोऽपि विष्णुभक्तोऽसि विष्णुव्रतपरायणः॥शिवरात्र्यांनोपवसेच्छ्रवणेसं
गतेपिच॥उदयादभिजिल्लग्नगामिनिश्रुतिवासरे॥तत्रैवोपोष

णंकार्यंमुहूर्तेसप्तमेपिच॥एकोनषष्टिघटिकात्रयस्त्रिंशत्पलाधि
का॥श्रोणाचपौर्णमासीचनोपोष्याविष्णुतत्परैः॥उत्तराषाढमि
श्रंयत्श्रवणंतत्परित्यजेत्॥एकोनषष्टिघटिकाश्रवणद्वादशीं
त्यजेत्॥पूर्वत्रयदिसंपूर्णपरत्रश्रवणंपुनः॥तदानोपोषणंकार्यं
द्वादश्यांविष्णुतत्परैः॥विद्धार्क्षेचयदापूर्णद्वादशीविषमाभवेत्॥
उपवासोनकर्तव्योगार्ग्यस्यवचनंयथा॥द्वादश्याःश्रवणस्या
पिमध्याह्नोपरिसंगमः॥तदैवोपोषणंकार्यंन्यूनंचेन्नैवकार
येत्॥देवानांचऋषीणांचपितॄणांचविशेषतः॥अन्नंनदद्यात्कृ
ष्णाहे भगवंतंहरिंविनेतिदत्तात्रेयसंहितायां॥एकादश्यांयदाब्र
ह्मन्सुदर्शनिमखोभवेत्॥अन्वाधानादिदेवानांमंत्रानुच्चार्यके
वलं॥तत्स्थानेविष्णुमुद्दिश्यमूलेनैवहुनेत्सुधीः॥इतिहासमि

Indira Gandhi National Centre for the Arts

वि॰ मंपुण्यंश्रुणुयाद्यःसदानरः॥समुक्तःसर्वपापेभ्योविष्णुलोकंस नि॰
१२ गच्छति॥ ॥इतिभविष्योत्तरपुराणेकृष्णयुधिष्ठिरसंवादेविष्णु
पंचकनिर्णयेकैथनोनामषण्नवत्यध्यायः॥श्रीकृष्णार्पणमस्तु॥छ॥



Indira Gandhi National
Centre for the Arts